VSA
A Real English Medium School

# VIDYA SHREE ACADEMY
SR. SEC. SCHOOL
An English Medium Co.Ed. School | Science & Commerce

Little Steps
Pre Primary wing of VSA

W : www.vsajaipur.com | E : vsajaipur@gmail.com M. : +91 9460356652, 8058999828
Add. : 84, Krishna Vihar, Behind Narayan Niwas, Gopalpura Bypass, Jaipur - 302015
/vsajaipur | /vsajaipur | /vidyashreeacademy | /vsa_jaipur

Subject-Sanskrit Class- 9 and 10 Topic- अपठित गद्यांश

**प्रश्न 11. अधोलिखितंगद्यांशं पठित्वा एतदाधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखतु–**

संस्कृतभाषाया: वैज्ञानिकतां विचार्य एव सङ्गणकविशेषज्ञा: कथयन्ति यत् संस्कृतमेव सङ्गणकस्य कृते सर्वोत्तमा भाषा विद्यते। अस्या: वाङ्मयं वेदै:, पुराणै:, नीतिशास्त्रै: चिकित्साशास्त्रादिभिश्च समृद्धमस्ति। कालिदास-सदृशानां विश्वकवीनां काव्यसौन्दर्यम् अनुपमम्। चाणक्यरचितम् अर्थशास्त्रं जगति प्रसिद्धमस्ति। गणितशास्त्रे शून्यस्य प्रतिपादनं सर्वप्रथमं भास्कराचार्य: सिद्धान्तशिरोमणौ अकरोत्। चिकित्साशास्त्रे चरकसुश्रुतयो: योगदानं विश्वप्रसिद्धम्। भारतसर्वकारस्य विभिन्नेषु विभागेषु संस्कृतस्य सूक्तय: ध्येयवाक्यरूपेण स्वीकृता: सन्ति। भारतसर्वकारस्य राजचिह्ने प्रयुक्तां सूक्तिं 'सत्यमेव जयते' सर्वे जानन्ति। एतमेव राष्ट्रिय शैक्षिकानुसन्धानप्रशिक्षण-परिषद: ध्येयवाक्यं 'विद्ययाऽमृतमश्नुते' वर्तते।

**(क) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत।** 1

**(ख) यथानिर्देशं प्रश्नान् उत्तरतु–**

1. अर्थशास्त्रं केन रचितम्? 1
2. कस्य कृते संस्कृतमेव सर्वोत्तमा भाषा विद्यते? 1
3. भारतसर्वकारस्य राजचिह्नं किम् अस्ति? 1
4. विद्ययाऽमृतमश्नुते कस्य ध्येय वाक्यम्? 1
5. केषां कवीनां काव्यसौन्दर्यम् अनुपमम्? 1

**(ग) यथानिर्देशं प्रश्नान् उत्तरतु–**

1. "सर्वोत्तमा भाषा विद्यते" अत्र विशेषणपदं किम्? 1
2. "सङ्गणकविशेषज्ञा: कथयन्ति" अत्र कर्तृपदं लिखत। 1
3. 'अविचार्य' इत्यस्य विलोमपदं गद्यांशात् चित्वा लिखत। 1
4. "सूक्तय: स्वीकृता: सन्ति" इत्यत्र क्रियापदं लिखत। 1

**अधोलिखितं गद्यांशं पठित्वा एतदाधारित प्रश्नानाम् उत्तराणि यथानिर्देशं लिखतु–**

अस्मिन् संसारे न कोऽपि देशो प्रान्तो वा विद्यते यत्रत्याः जनाः कालिदासं न विंदन्ति। भारतीयेषु कविषु, कालिदास एव भूयसी कीर्तिमलभत। आनन्दवर्धनाचार्यः कालिदासं महाकविमाह। प्रसन्नराघवस्य कर्त्ता जयदेवस्तं 'कविकुल गुरुः कालिदासो विलासः' अकथयत्। कविकुलगुरुर्महाकविकालिदासः संस्कृत–साहित्यस्य अद्यावधि कनिष्ठिकाधिष्ठितः कविरस्ति।

कालिदासविरचित–ग्रन्थेषु रघुवंश कुमारसंभवञ्चेति द्वे महाकाव्ये, मेघदूत ऋतुसंहारमिति खण्डकाव्यद्वयम्। मालविकाग्निमित्रं विक्रमोर्वशीयं अभिज्ञानशाकुन्तलादीनि त्रीणि नाटकानि। एषु ग्रन्थेषु रघुवंशमहाकाव्यं यथा चरित्र वर्णनदृष्ट्या गौरवान्वितं स्वीक्रियते, तथैव अभिज्ञानशाकुन्तलं नाम नाटकं समस्तेऽपि नाट्य साहित्ये सर्वोत्कृष्टं स्थानं लभते। कालिदासस्य समग्रसाहित्यं प्रसादगुणवैदर्भीरीत्या संवलितं वर्तते। उपमा क्षेत्रे तु कालिदासः अद्वितीयः कविरस्ति। संस्कृतसाहित्ये 'उपमा कालिदासस्य' इत्युक्तिः प्रसिद्धा वर्तते।

**( क ) अस्य गद्यांशस्य समुचितं शीर्षकं लिखतु।** 1

**( ख ) यथानिर्देशं प्रश्नान् उत्तरतु–**

1. संस्कृतसाहित्यस्य कनिष्ठिकाधिष्ठित कविः कः? 1
2. कस्मिन् क्षेत्रे कालिदासः अद्वितीयः कविरस्ति? 1
3. कालिदासं महाकविं कः आह? 1
4. 'कविकुलगुरुः कालिदासो विलासः' इति कः अकथयत्? 1
5. कालिदासविरचितखण्डकाव्यस्य नाम लिखत। 1

**( ग ) यथानिर्देशं प्रश्नान् उत्तरतु–**

1. "यत्रत्याः जनाः कालिदासं न..........।" अत्र समुचितं क्रियापदं किमस्ति? 1
2. 'द्वे महाकाव्ये'—इत्यत्र विशेषणपदं किम्? 1
3. "कालिदास एव भूयसी कीर्तिमलभत।" अस्मिन् वाक्ये कर्तृपदं किम् प्रयुक्तम्? 1
4. अस्मिन गद्यांशे 'द्वितीयः' पदस्य विलोमपदं किं प्रयुक्तम्?